
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

श्रीआत्मषट्कप्रारंभः

श्री०
१

श्रीगुरुभ्योनमः॥ श्रीगजाननायनमः॥ इत्थमध्यायत्रये
णप्राणविद्याप्रपंचिता॥ तावताब्रह्मविद्यायांपुरुषस्यमुख्या
धिकारः संपन्नः॥ कर्मकांडोक्तैः कर्मभिर्विविदिषायाउत्प
न्नत्वादुपासनयाचित्तैकाग्र्यस्यसंपन्नत्वाच्च॥ तत्संपत्तौश
मादयोगुणाअर्थसिद्धाः॥ तेध्यात्मविद्यायामंतरंगभूताः॥ शांतो
दांतउपरतस्तितिक्षुः समाहितः॥ श्रद्धावित्तोभूत्वात्मन्येवात्मा
नंपश्यतीतिश्रुतेः॥ अतोस्त्वमुख्याधिकारिणंमुपलभ्यश्रुति
रध्यायत्रयेणब्रह्मतत्वंविस्पष्टमुपदेष्टव्यमादौतत्वंसंग्रहेण

श्री०
१

सूचयति॥ आत्मावाइदमेकएवाग्रआसीन्नान्यत्किंचनमि
षदिति॥ आत्मशब्दार्थोमहर्षिभिरेवंस्मर्यते॥ यच्चाप्नोतिय
दादत्तेयच्चात्तिविषयानिह॥ यच्चास्यसंततोभावस्तस्मादात्मे
तिगीयते॥ द्विविधोह्यात्मा॥ व्यवहारविशिष्टः केवलश्चेति॥ व्य
वहारोपित्रिविधः जाग्रत्स्वप्नः सुषुप्तंचेति॥ तत्रसुषुप्तावयं
जीवः स्वोपाधिविलयेसतिपरमानंदब्रह्मरूपंप्राप्नोति॥ तथा
चश्रुतिः॥ सुषुप्तिकालेसकलेविलीनेतमोभिभूतः सुखरू
पमेति॥ तस्मादाप्नोतीत्यात्मेतिस्मर्यमाणंप्रथमंनिर्वचनंद्रष्ट

२

श्री० २

व्यं॥ स्वप्नस्थोयंजीवः जागरस्थपदार्थवासनाः सर्वाआदत्ते
तथाचवाजसनेयिनः पठंति॥ सयत्रप्रस्वपित्यस्यलोकस्यस
र्वावतोमात्रामपादायस्वयंविहत्यस्वयंनिर्मायस्वेनभासास्वेन
ज्योतिषाप्रस्वपितीति॥ अस्यायमर्थः॥ यदायंजीवोवाक्चक्षु
रादिदशविधबाह्यकरणोपरतिरूपंप्रस्वापंप्राप्नोतितदानीं
सर्ववतोगिरिनदीसमुद्रमनुष्यपश्वादिसर्वपदार्थोपेतस्येंद्रि
यैरवलोक्यमानस्यजगतोमात्रांलेशरूपांवासनामपादायत
त्तत्पदार्थेभ्यवच्छिद्यस्वयंविहत्यस्वयंस्वीकृत्यततोजागरणाभि

भ्यो

श्री० २

मानंस्वयमेवविनाश्यस्वप्नेजाग्रत्स्वरूपंचस्वयमेवनिर्माय
जगदाकारेणपरिणमतेस्वेनभासास्वकीयेनांतःकरणेनत
थास्वेनज्योतिषास्वरूपचैतन्येनकल्पितपदार्थावभासकेन
युक्तःसन्प्रस्वपितितस्माद्वासनास्वीकारादादत्तेइत्यात्मे
तिद्वितीयंनिर्वचनंद्रष्टव्यं॥ जाग्रदवस्थायांचक्षुरादींद्रियैर्बा
ह्यान्रूपादीन्विषयानत्तिभुंक्ते॥ तथाचश्रुतिः॥ स्त्र्यन्नपानादि
विचित्रभोगैःसएवजाग्रत्परितृप्तिमेति॥ ततोबाह्यविषयभो
गानत्तीत्यात्मेतितृतीयंनिर्वचनंद्रष्टव्यं॥ उपाधिविशिष्टस्याव

श्री०
३

रुछात्रयमुपजीव्यनिर्वचनत्रयमुक्तं॥ अथकेवलस्यनिर्वच
नमुच्यते॥ यद्यस्मात्कारणादस्यात्मनोभावःस्वभावविशिषः
संततःपरिछेदरहितः॥ तथाचश्रुत्यंतरसत्यंज्ञानमनंतंब्र
ह्मेत्यत्रदेशादिपरिछेदराहित्यलक्षणमानंत्यमभिहितंतस्मा
दततिसातत्येनसर्वत्रगछतीत्यात्मेतिचतुर्थनिर्वचनंद्रष्टव्यं
॥इत्येवंसतिअत्रात्मत्वनिर्दर्शनेनस्य्यप्रस्तुतत्वादखंडैकरस
त्वेनसंतत्वमात्मशद्वप्रवृतिनिमित्तं॥ यदिधातुप्रत्ययजन्यमव
यवार्थमुपेक्ष्यरूढिमाश्रित्यस्वरूपवाचित्वमुच्यतेतदाप्यध्यस्त

श्री०
३

स्यनिखिलस्यजगतोधिष्ठानत्वेनसर्वस्वरूपत्वमस्ति॥ नह्या
रोपितानांसर्पधारादंडमालाबलीवर्दमूत्रितत्वादीनामधिष्ठा
नभूतांरज्जुमंतरेणकिंचिदन्यद्वास्तवंस्वरूपमस्ति। किंबहु
ना॥ यद्ययमात्मशद्वोयोगिकःयदिवारूढःसर्वथापिसंतते॥
खंडैकरसःसर्वजगदधिष्ठानत्वेनतदीयवास्तवस्वरूपःभू
तःतत्पदार्थआत्मशद्वेनविवक्षितः॥ वैशद्वोवधारणार्थः॥ इ
दमिदानींसार्वजनीनप्रत्यक्षादिप्रमाणैःसर्वैरपिप्रतीयमानं
जगदग्रेस्टष्टेःपूर्वमात्मैवासीन्नतुतत्कार्यभूतंनामरूपात्म

(५)

श्री०
४

कंजगदासीन्नाप्यात्मगोचरौशब्दप्रत्ययौवापूर्वमास्तांलोकेमृ
त्कार्यभूतघटशरावाद्युत्पत्तेःपूर्वंमृदेवास्ति॥ननुघटादिकंतथा
पिमृद्गोचरौशब्दप्रत्ययौविद्येते॥एवमप्यत्रापिप्रसक्तौसत्यांशब्दप्र
त्ययावपिवैशब्देननिराक्रियेतेव्यावर्त्तेतेदेहेन्द्रियादीनामभावेनजि
ह्वानिष्पाद्यस्यशब्दस्यमनोनिष्पाद्यस्यप्रत्ययस्याचाभावःसुत
रामुपपद्यते॥नन्विदमात्मासीदितिसामानाधिकरण्येनजगद्वैशि
ष्ट्यमात्मनःप्रतीयते॥नीलमुत्पलमितिसमानाधिकरण्यश्रवणे
सत्युत्पलद्रव्यस्यनीलत्वगुणवैशिष्ट्यस्यप्रतिभासात्।मैवं।वैशि

श्री०
४

ष्ट्येसत्यग्रशब्दस्यवैयर्थ्यप्रसंगात्॥इदानींजगद्विशिष्टात्माप्र
तिभासतेइत्यनुपपत्त्यास्थितिकालंपरित्यज्यकेवलमात्मानंव
क्तुमग्रशब्देनस्रष्टेःप्राचीनःकालःगृह्यतेउपादीयते॥ईदृशः
सयदितत्रापिजगदनुवर्त्ततेतदानींव्यर्थोयमग्रशब्दप्रयासः
स्यात्॥सामानाधिकरण्यंतुबाधायामप्युपपद्यते॥यस्त्वदीय
श्चोरःसस्थाणुरित्येवंबाधायाःदर्शनात्।तद्वदत्रापियज्जगत्वे
नेदंजगत्किंत्वात्मैव॥बाढंतथापिबुभुत्सोर्मूढस्यजगत्वप्रत्य
यदार्ढ्यादनुभवविरोधभ्रमोमाभूदितिस्रष्टेःप्राचीनकालउप

श्री॰ न्यस्यते॥ कालस्यापिसृष्ट्यंतर्भावात् कालवाचकोग्रशब्दोनुप
५ पन्नइतिचेत्‌न॥ परप्रसिध्यनुसरणार्थत्वात्॥ परप्रसिध्यापरोबो
धनीयइतिन्यायः॥ परस्य बुभुत्सोः पूर्वसृष्टिवर्त्तमानसृष्ट्योर्म
ध्येप्रलयकालप्रसिद्धिरस्ति। अतस्तदीयभाषयाबोधयितुम
ग्रइत्युच्यते॥ अनेनैवन्यायेनात्मासीदितिशब्दद्वयंपरप्रसि
ध्यायोज्जनीयं॥ अन्यथापुनरुक्तिपरिहारायशब्दद्वयस्यार्थ
भेदेंगीकृतेसतिसत्ताविशिष्टआत्मेत्येवंप्रतिभासादखंडार्थ श्री॰
त्वंहीयेतहीनंभवेत्श्रुतेः आत्मशब्दसच्छब्दोपर्यायत्वेनाभिमता ५

वतएवात्मावाइदमेकएवाग्रआसीदित्यस्यस्थानेछंदोगाः स
देवसोम्येदमग्रआसीदितिपठंति॥ सर्वथासर्वभेदशून्यआत्मा
त्रविवक्षितो॥ ननुहिरण्यगर्भादिलौकिकआत्मा॥ एतच्चतृती
याध्यायस्यतृतीयपादेचिंतितं॥ आत्मावाइदमित्यत्रविराट
स्यादथवेश्वरः॥ भूतासृष्टेर्नेश्वरः स्याज्जवाद्यानयनाद्विराट्॥
भूतोपसंहृतेरीशः स्याददैतावधारणात्॥ अर्थवादोगवाद्युक्तिं
ब्रह्मात्मत्वंविवक्षितं॥ आत्मावाइदमेकएवाग्रआसीदित्य
त्रविराट्स्यात्॥ अथवेश्वरइतिसंदेहेविराडेवात्मशब्दवाच्यः

(6)

श्री०
६

नेश्वर इतिकुतः सईक्षतल्लोकान्नु सृजा इति पंचभूतसृष्टिमनुक्त्वा लोकमात्रसृष्टेरभिधानात्॥ ईश्वरप्रकरणेषु तैत्तिरीयछंदोग्यादिषु भूतसृष्ट्यभिधानदर्शनात्॥ अयोगामानयदिति चोक्तं गवाद्यानयनं शरीरिणो विराजो घटते॥ न त्वशरीरस्य परमेश्वरस्येति प्राप्ते ब्रूमः॥ एक एवाग्र आसीदित्यद्वैतावधारणादीश्वरो आत्मशब्दार्थः॥ तथा सति शाखांतरोक्तभूतसृष्टिरत्रोपसंहर्तुं शक्यते॥ यत्तु गवाद्यानयनं तदर्थवादरूपं

श्री०
६

तद्वेदनस्य स्वातंत्र्येण पुरुषार्थत्वाभावात्॥ अथ भूतार्थवादत्वं मन्येथास्तर्हि विराडादिद्वारा परमेश्वर एव गवादिकमानयत्तु॥ श्रूयमाणस्य गवानयनादिप्रपंचस्य सर्वस्यार्थवादत्वे श्रुतेर्विवक्षितो र्थो कोपि न सिध्येदिति चेन्न॥ जीवब्रह्मैक्यस्य विवक्षितत्वादात्मा वा इदमेक एवेत्युपक्रम्य स एतमेव पुरुषं ब्रह्म प्रज्ञानं ब्रह्मेत्युपसंहारात् तस्मादीश्वर आत्मशब्दवाच्यः॥ तदेवमनेन वाक्येनाखंडैकरसमात्मतत्वं सूचितं भवति॥ एकादिशब्दैरखंडैकरसत्वमेव स्पष्टीक्रियते॥ लोके वृक्षादिपदार्थेषु स्वगतः सजातीयो विजातीयश्चेति त्रिविधो भेदोस्ति॥ यथा शाखास्कंधपत्रादी

7

नांपरस्परप्रतियोगिकोवृक्षस्यस्वगतोभेदः वृक्षांतरप्रतियो
गिकः सजातीयः पाषाणादिप्रतियोगिको विजातीयः॥ तद्वदात्म
नोपिप्रसक्तावेकशब्देनस्वगतोभेदोव्यावर्त्यते॥ वृक्षवन्नानात्म
कोनभवतिकिंत्वेकात्मकइत्यर्थः॥ एवशब्देनात्मांतरव्यावृत्तिः यो
यमेकः सएवनतत्वन्यःकश्चित्ताद्दशइत्यर्थः॥ नान्यदित्यादिनावि
जातीयभेदोनिषिध्यते॥ अन्यत्प्रकृतादात्मनोविलक्षणंकिंचनकिं
चिदपिवस्तुन। मिषद्धात्वनामनेकार्थत्वान्नासीदित्युक्तंभवति॥
नचजगदुत्पादनायमायाख्यायाः शक्तेरंगीकार्यत्वादन्यसद्भा

वः शंकनीयः आत्मशक्तित्वेनावस्तुत्वेनचमायायाः पृथगभि
धानानर्हत्वान्नहिभृत्येभ्योजीवितंप्रयच्छतः स्वामिनः तवैतावद्ध
नंत्वदीयशक्तेश्चैतावदितिविभज्यगणयंतिनाप्यवस्तुभूतंचं
द्रप्रतिबिंबादिकंअभिलक्ष्यद्वौचंद्रमसौवस्तुभूतावित्येवंबुद्धि
मंतोव्यवहरंति॥ तस्मादंगीकृतायामपिमायायामात्मनोखंडैक
रसात्मतायांनकोपिविघ्नोस्ति॥ इत्थंसंग्रहेणात्मतत्वंसूत्रितंत
च्चाध्यारोपापवादाभ्यांप्रपच्यंते॥ तच्चसईक्षतेत्यारभ्यायमावस
थइत्यंतेनग्रंथेनासेपंप्रपंचयितुकामआदावारोपंसंगृह्णाति॥

श्री० ८

सईक्षतलोकान्नुसृजाइतिसइमाल्लोकानसृजतेइति॥आत्मावाइ
दमित्यनेनसूत्रेणसूचितःसपरमेश्वरःपृथिव्यादीन्लोकान्स्र
क्ष्यामीत्येवंईक्षणंविचारंकृतवान्नुशब्दोवितर्के॥इत्यंविचार्यपरमे
श्वरइमाल्लोकानसृजत॥यद्यप्यत्रात्मैवेतिकेवलंतत्वंप्रकृतंतथा
पिनिर्विकारस्यजगद्भावापत्तित्यसंभवाच्छारवांतरोक्तामाया
शक्तिरप्यर्थादुक्तेतिद्रष्टव्यं॥मायांतुप्रकृतिंविद्यान्मायिनंतुमहे
श्वरमितिहिश्रुत्यंतरं॥इंद्रोमायाभिःपुरुरूपईयतेतिच॥मा
यासहितस्योपादानस्यविवक्षितत्वाद्विवर्त्तवादएवात्राभ्युपेतव्यो

श्री० ८

नत्वारंभपरिणामवादौ॥यद्यपिलोकान्नुसृजाइत्येतावन्मा
त्रविचारेणकुलालवन्निमित्तकारणत्वमेवप्रतीयतेतथापिसो
कामयतबहुस्यांप्रजायेयेतिशारवांतरगतस्यस्वकीयबहुभा
ववाक्यविचारस्यगुणोपसंहारन्यायेनात्रोपसंहारादुपादा
नत्वमपिसिध्यति॥एतच्चभगवताव्यासेनसूत्रितं॥प्रकृति
श्चप्रतिज्ञादृष्टांतानुपरोधादिति॥योयंपरमात्मानासौकेवलं
निमित्तमेव॥किंतुप्रकृतिरुपादानमपिकुतः॥येनाश्रुतंश्रुतं
भवतीत्येकेनविज्ञानेनसर्वविज्ञानंप्रतिज्ञायउपादानरूपद

श्री०
१०

ष्टांतस्यानुसारात्तदेतत्सूत्रोक्तंस्वपक्षसाधनपरपक्षदूषण
मुखेनस्मृतिपादेनतर्कपादेनचप्रपंचितं॥स्रष्टव्यानांलोका
नांभौतिकत्वेनभूतव्यतिरेकेणासंभवाद्भूतसृष्टिरप्यत्रउपसं
हरणीया॥साचान्यत्रैवमाम्नायते॥तस्माद्वाएतस्मादिति॥एत
द्विषयविचारश्च द्वितीयाध्यायेतृतीयपादस्यपूर्वभागेप्रतिपादितः॥
परमेश्वरस्यसत्यसंकल्पाद्भूतसृष्टौलोकसृष्टौवासंकल्पव्य
तिरिक्तंसाधनांतरंनापेक्षितं॥अतएवान्यत्रश्रूयतेसत्यकामः
सत्यसंकल्पइति॥सतपस्तप्त्वाइदꣳसर्वमसृजतेत्यत्रश्रवणा

श्री०
१०

त्तपोरूपंसाधनमपेक्षितमितिचेन्नैवं॥नह्यत्रकृच्छ्रचांद्रायणा
दिकंतपः किंतुस्रष्टव्यसंकल्पएव॥यस्यज्ञानमयंतपइतिश्रुत्यं
तरात्संकल्पस्यनिरंकुशत्वान्नास्तीश्वरस्यभूयान्प्रयासः॥तस्य
चसंकल्पस्यसत्यत्वाज्जगतोनमनोराज्यतुल्यत्वं। येलोकाःप
रमेश्वरेणसृष्टास्तांस्तान्स्वस्वनाम्नानिर्दिशति॥अंभोमरीचीर्म
रमापइति॥एतेषांशब्दानांलोकवाचित्वप्रसिद्धेरभावात्स्वयमे
वश्रुतिर्व्याचष्टे॥अदोंभः परेणदिवंद्यौः प्रतिष्ठांतरिक्षंमरीचयः
पृथिवीमरोयाअधस्तात्ताआपइति॥दिवंपरेणद्युलोकस्योपरि

श्री०
१०

महर्लोकजनोलोकतपोलोकसत्यलोकायेसंतियाचद्यौः प्रति
ष्ठाआश्रयः सर्वेषांदेवानामाश्रयभूर्लोकद्युलोकइदमदोंभः एत
त्सर्वमंभः शब्दवाच्यं। लोकेषुपंचभूतानांसाधारणत्वेपिजलस्या
स्मिंदुपलब्धियोग्यत्वेनप्राधान्यमभिप्रेत्यादोंभैत्युक्तं॥ उपरित
नलोकाद्वृष्टिद्वारेणागतमंभएवास्माभिः साक्षादुपलभ्यते॥ न
तुभूतांतरं॥ सूर्यमरीचीनामाधारत्वादंतरिक्षलोकोमरीचय
इतिशब्देनोच्यते॥ भूर्लोकवर्तिनांप्राणिनांसहसाम्रियमाणत्वा
न्मरशब्देनपृथिव्युपलक्ष्यते॥ पृथिव्याअधस्तात्पाताल विशेषरू

३

श्री०
१०

पाभोगभूमयोयाः संतिताः सर्वास्तल्लोकवासिभिः नागादि
भिराप्यमानत्वादापइत्युच्यते॥ लोकस्टष्टिसुष्टकापालकाभा
वेनलोकानांविनाशोमाभूदितिपालकस्टष्टिंदर्शयति॥ स
ईक्षतेमेनुलोकालोकपालान्नुस्टजाइतिसोद्भ्यः एवपुरु
षंससमुद्धृत्यामूर्छयदिति॥ सपरमेश्वरः पुनरपि विचारितवा
निमेलोकानिष्पन्नास्तेषांभोगस्थानानामचेतनानांलोकानां
रक्षणार्थंचेतनाल्लोकपालकान्देवान्सर्वथास्त्रक्ष्ययामीतिस
विचारयुक्तईश्वरोअद्भ्यएवजलोपलक्षितपंचभूतेभ्यएवपुरु

(11)

श्री०
११

षंपुरुषाकारविराट्पिंडंसमुद्धृत्यामूर्छयत्तम्मूर्छंकठिणमकरो
द्यथाकुलालस्तटाकेजलस्याधस्तादार्द्रंमृदमानीयशोषयित्वा
कठिणंपिंडंकरोतितद्वदयंविराट्पुरुषःसमष्टिरूपोब्रह्मांडरू
पस्यलोकपालकः॥अथतदवांतरलोकपालकानांचेतनानाम
ग्न्यादिदेवतानांसृष्टिंदर्शयति॥तमभ्यतपत्तस्याभितप्तस्यमुखं
निरभिद्यतयथांडंमुखाद्वाग्वाचोग्निर्नासिकेनिरभिद्येतांनासि
काभ्यांप्राणःप्राणाद्वायुरक्षिणीनिरभिद्येतामक्षीभ्यांचक्षुश्चक्षु
षआदित्यःकर्णौनिरभिद्येतांकर्णाभ्यांश्रोत्रंश्रोत्राद्दिशस्त्वङ्नि

श्री०
११

रभिद्यहृदयान्मनोमनसश्चंद्रमानाभिर्निरभिद्यतनाभ्याअपा
नोपानान्मृत्युःशिश्नंनिरभिद्यतशिश्नाद्रेतोरेतसआपइति॥तं
निरभिद्यतशिश्नाद्रेतोरेतसआपइति॥तंविराट्पुरुषदेहमभ्य
तपदभितप्तस्तत्रछिद्रंजातंइंद्रियतदभिमानिदेवतासृष्ट्यर्थंसपर
मेश्वरःपर्यालोचितवान्पर्यालोचनमेवतपइतिपूर्वमुक्तं॥अभि
तःपर्यालोचितस्यविराट्पिंडस्यमुखंछिद्रंनिरभिद्यतमुखछि
द्रंविदारितमभूत्॥यथामक्षिसर्पादीनांपक्कमंडंभिन्नंभवतितद्व
दस्मान्मुखछिद्राद्वागिंद्रियंनिष्पन्नं॥तस्माच्चेंद्रियादग्निर्देवता

श्री०
१२

निष्पन्ना॥ एवमुत्तरपर्यायेष्वपि छिद्रेंद्रियदेवताव्याख्येयाः॥
प्राणोघ्राणेंद्रियं॥ लोमशब्देनतदाधारभूतंत्वग्छिद्रंस्पर्शनेंद्रिय
मुच्यते॥ हृदयमष्टदलकमलं॥ अपानोधःसंचारीवायुः॥ रेतोगु
ह्येंद्रियं॥१॥ ॥इंद्रियाणामभिमानिदेवतानांचसृष्टिरुक्ता॥ अ
थतासांदेवतानांभोगयोग्याल्पशरीरंविवक्षुर्वक्तुमिच्छुःप्रकृत
सिध्यर्थाचिंताऔपोद्घातकीस्तदुपोद्घातत्वेनक्षुत्पिपासयोःसृ
ष्टिंदर्शयति॥ ताएतादेवताःसृष्टाअस्मिन्महत्यर्णवेप्रापतंस्त
मशनापिपासाभ्यामन्ववार्जदिति॥ याःइंद्रियतदभिमानिदेवताः

श्री०
१२

स्त्रष्टारंपरमेश्वरंमत्येवमब्रुवन्भोपरमेश्वरायंविराट्देहोस्मा
कंभोगाक्षमोनभवति॥ अतिप्रौढंतंविराट्देहमापूर्यतत्रप्रति
ष्ठांप्राप्तुंवयमसमर्थाःअन्नंचैतद्देहपर्याप्तंसंपादयितुंवयम
समर्थाः अतोयस्मिन्नल्पशरीरेप्रतिष्ठिताःसत्योवयंतद्देहप
र्याप्तमन्नमत्तुंशक्ताभवामःतादृशमायतनंशरीरंनोस्मदर्थंप्र
जानीहिअवधारयसंपादयेत्यर्थःततःपरमेश्वरस्ताभ्योभोगा
यगोदेहमानयत्ताश्चदेवताःपरमेश्वरमब्रुवन्नोस्माकम
यंदेहोनैवालमुपरितनानांदंतानांअभावेनदूर्वादिमूलस्यो

श्री०
१३

त्यक्तुमशक्यात्ततोयमपिगोदेहस्तिष्ठतुइतोयमस्तुभयतोदंतदे
हंस्त्यजेत्येतदेवमब्रुवन्ततःपरमेश्वरस्तदर्थमश्वदेहमानयत्॥
ताश्चदेवताविवेकज्ञानाभावादयमश्वदेहोपिनपर्याप्तइत्युक्तवत्य
स्ततःपरमेश्वरस्तदर्थंविवेकज्ञानसंपन्नंपुरुषदेहमानयत्तता
श्चदेवतास्तावतापरितुष्टाआश्चर्यवाचकेनबतशब्देनस्वकीयं
परितोषंसूचयंत्यःसुष्ठुकृतंपरमेश्वरेणेत्यब्रुवन्॥यस्मान्म
नुष्यदेहेनविवेकज्ञानसंपन्नस्तथाचपूर्वमुदाहृतं॥पुरुषेत्वा श्री०
विस्तरामात्मासहिप्रज्ञानेनसंपन्नतमोविज्ञातंवदतिविज्ञातं १३

पश्यतिवेदश्वस्तनंवेदलोकालोकौमर्त्येनामृतमीप्सत्येवंसंप
न्नइति॥ ॥तस्मान्मनुष्यदेहैवसुकृतमित्यनेनशब्देनपरितोष
घातकेनवक्तुंयोग्यईश्वरःसृष्टेषुभोगक्षमशरीरेषुदेवानांप्रवेशा
येश्वरप्रेरणंदर्शयति॥ताअब्रवीद्यथायतनंप्रविशतेत्यग्निर्वाग्भू
त्वामुखंप्राविशद्वायुःप्राणोभूत्वानासिकेप्राविशदादित्यश्चक्षु
र्भूत्वाक्षिणीप्राविशद्दिशःश्रोत्रंभूत्वाकर्णौप्राविशन्नोषधिवनस्प
तयोलोमानिभूत्वात्वचंप्राविशंश्चंद्रमामनोभूत्वाहृदयंप्राविशन्मृ
त्युरपानोभूत्वानाभिंप्राविशदापोरेतोभूत्वाशिश्नंप्राविशन्निति॥य

श्री०
१४

स्मिन्नायतने छिद्रे यदिंद्रियमुत्पन्नं याचाभिमानिनी देवतोत्पन्ना
तदीयमनतिक्रम्य देवताः प्रविशत ॥ इत्थमनुज्ञातानां प्रवेशं दर्श
यति ॥ योयमग्निर्वागिंद्रियाभिमानी देवः सोय वाग्भूत्वा वागिंद्रिय
एवांतर्भूय मुखच्छिद्रं प्राविशदेवमुत्तरत्रापि योज्यं ॥ न खलु वागा
दिष्विंद्रियेषु अग्न्यादिदेवताः प्रत्यक्षमुपलभ्यंते ॥ नापि देवताभि
प्रेरितवागादींद्रियाणां स्वस्वविषयग्रहणसामर्थ्यमस्ति ॥ एतच्च
भगवता व्यासेन सूत्रित ॥ ज्योतिराद्यधिष्ठानं तु तदामननादिति ॥
ज्योतिरादिभिरग्न्यादिदेवैरधिष्ठानं वागादींद्रियाणां प्रेरणमभ्यु

श्री०
१४

पगंतव्यं ॥ कुतः तदामननात् ॥ तस्य देवताप्रेरणस्याग्निर्वाग्भू
त्वेत्यादिश्रूयमाणत्वाद्यथायं विचारो द्वितीयाध्यायस्य चतुर्थपा
दे सूत्रितः ॥ एवमन्येपींद्रियविषयविचारास्तस्मिन्पादे द्रष्टव्याः ॥
क्षुत्पिपासयोर्विराड्देहनियतस्य स्थानविशेषस्य पूर्वमश्रवणा
त्कृत्स्नशरीरे प्रवेशं दर्शयति ॥ तमशनापिपासे अब्रूतामावाभ्या
मभिप्रजानीहीति ते अब्रवीदेतास्वेव वां देवतास्वाभजाम्येतासु भा
गिन्यौ करोमीति तस्माद्यस्यै कस्यै च देवतायै हविर्गृह्यते भागिन्या
वेवास्यामशनापिपासे भवत इति ॥ योस्तु क्षुत्पिपासे परमेश्वरेणवि

श्री०
१५

राट्देहसंयोजितेतेउभेपरमेश्वरंप्रतिस्वार्थस्थानविशेषमनुग्र
हाणेतिअब्रूतामीश्वरस्तत्स्थानविशेषमदृष्ट्वावामुभेअप्येतास्वे
वाग्न्यादिदेवतास्वाभजामितस्तास्वेवभागिन्यौविषयभागयु
क्तेकरोमीत्यब्रवीत्यस्मादेवमीश्वरेणोक्तंतस्माल्लोकेयस्यैक
स्यअप्यग्न्यादिदेवतायैहविर्गृह्यतेभोग्यंवस्तुसमर्प्यते॥अस्या
मग्न्यादिदेवतायामेतेक्षुत्पिपासेभागयुक्तएवभवतः॥अग्निवा
य्वादिदेवतानांशरीरेष्वप्याहारस्वीकारेक्षुत्पिपासयोरेवतृप्तिर्भव
तितथामनुष्यशरीरेपिचक्षुरादिदेवतायैहविःस्वीकारेक्षुत्पिपा

श्री०
१५

सेतृप्यतः॥यदापात्रेपतितंसमीचीनमन्नंभोक्तुकामश्चादरेण
पश्यतितदानींभोगस्यप्रसामीप्यात्प्रत्यासन्नत्वात्परितोषेणम
नसित्वच्छाशांतैवभवति॥ननुयथापूर्वमप्रबाधते॥एवमत्यंतप्रि
यान्नवार्त्ताश्रवणस्पर्शनादौयथोचितंतृप्तिलेशोद्रष्टव्यः॥तदेत
त्सर्वदेवतासुक्षुत्पिपासयोर्भोगोपेतत्वं॥२॥ ॥यानिभोगाद्यधि
ष्ठानानिगवाश्वपुरुषादिशरीराणियानिचभोगकरणानिवन्ह्या
दिदेवताधिष्ठितानिवाक्चक्षुरादीनिगवादिदेहेषुप्रविष्टानिता
निसर्वाण्यभिधायभोग्यस्तृष्टिमधत्ते॥सईक्षतमेनुल्लोकाश्चलो

(16)

श्री०
१६

कपालाश्वान्नमेभ्यःसृजाइतिसोपोभ्यतपत्ताभ्योभितप्ताभ्यो
मूर्त्तिरजायतयावैसामूर्त्तिरजायतान्नंवैतदिति॥ ॥सपरमेश्व
रःपुनरप्येवंविचारितवान्येपृथिव्यादिलोकाःयेचलोकपालाः
सेंद्रियशरीरदेवतारूपास्तेसर्वेपीमेस्रष्टाःखलुअतःपरमेश्व
रस्तेषामन्नमंतरेणजीवनासंभवादेतदर्थमन्नंस्रक्ष्यामीतिवि
चार्यान्ननिष्पादनार्थंतत्कारणभूतानिजलप्रधानादीनिपंचभूता
न्यभ्यतपत्सर्वतःपर्यालोचनमकरोत्॥ईदृशाज्जलंसहितात्से
त्राद्व्रीह्यादयोजायंतामीदृशानिमूषकादिशरीराणिमार्जारादीना

श्री०
१६

मन्नभूतानिजायंतामित्येवंसंकल्पंकृतवान्ताभ्योद्भ्योजलोप
लक्षितभूतेभ्योव्रीहियवादिरूपामूषकादिरूपाचमूर्त्तिरजायत
तत्रव्रीहियवादिमूर्त्तिर्मनुष्याणामन्नंतैरस्यभक्ष्यमाणत्वात्तथा
मूषकादिमूर्त्तिर्मार्जारादिभिरद्यमानत्वात्तेषामन्नं॥अन्नसृष्टिनु
रकाअन्वयव्यतिरेकाभ्यांतत्स्वीकारसाधनंनिश्चिनोति॥ ॥तदे
नत्सृष्टंपराङत्यजिघांसत्तद्वाचाजिघृक्षत्तन्नाशक्नोद्वाचाग्रहीतुंस
यद्धैनद्वाचाग्रहैष्यदभिव्याहृत्यहैवान्नमत्रप्स्यत्तत्प्राणेनाजिघृक्ष
त्तन्नाशक्नोत्प्राणेनाग्रहीतुंसयद्धैनत्प्राणेनाग्रहैष्यदभिप्राण्यहैवा

श्री०
१७

न्नमत्रष्यन्त्तच्चक्षुषा जिघृक्षत्तन्नाशक्तोच्चक्षुषाग्रहीतुंसयद्वैन
च्चक्षुषाग्रहैष्यद्दृष्ट्वाहैवान्नमत्रष्यत्तघ्रोत्रेणा जिघृक्षत्तन्नाशक्तोघ्रो
त्रेणग्रहीतुंसयद्धैनत्वचाग्रहैष्यत्स्पृष्ट्वाहैवान्नमत्रष्यत्तन्मनसा
जिघृक्षत्तन्नाशक्तोन्मनसाग्रहीतुंसयद्धैनन्मनसाग्रहैष्यद्विस्ट
ज्यहैवोन्नमत्रष्यत्तदपानेना जिघृक्षत्तदावयदिति॥ ॥यत्स्रष्ट
मन्नंव्रीहियवादिकंमूषकादिकंचतत्रव्रीह्याद्यन्नस्यस्वकीयवध
विषयविवेकज्ञानाभावाज्जंतुंमसमर्थत्वाच्चजनान्नास्तिपलायनं॥
यत्तुमूषकादिरूपंतदन्नंतेनमार्जारादीनांभोक्तृणांस्ववधहेतुत्व

श्री०
१७

निश्चित्यतेभ्यःपराङ्मुखंसदत्य जिघांसदतिशयेनहेतुंगं
तुमैछत्पलायनमारभतेत्यर्थः॥ पलायनमुद्युक्तंतन्मूषका
दिरूपमन्नंदृष्ट्वाभोक्तृवर्गोमार्जारादिर्वागिंद्रियेणग्रहीतुमै
छत्तत्सर्वप्रयत्नेनवागिंद्रियंप्रयुंजानोपितेनतदन्नंग्रहीतुंनाश
क्तोदिदानीलनोदाहरणेनसृष्टिकालीनातदन्नशक्तिःस्पष्टीक्रि
यते॥सभोक्तृवर्गआ दिसृष्टिकालेयद्येतन्मूषकादिरूपमन्नंवा
चाग्रहीयात्तदाइदानीअभिभोक्तान्तदन्नवाचकैःशब्दैरादृशमि
त्युक्तिमात्रेणतृप्तोभवेत्तनहिवागिंद्रियस्याभिधानव्यतिरेके

(18)

श्री॰
१८

णाकर्षणसामर्थ्यंकिंचिदस्तिनचैवमन्नवाचिकशब्दोच्चारणमा
त्रेणान्नंनिर्दृश्यतेतस्मात्सृष्टिकालेपिवाचोन्नस्वीकारेनास्तीत्य
नुमेयंज्ञातव्यं॥प्राणेनघ्राणेंद्रियेणएतदारभ्यशिश्नांतेषुषट्सु
पर्यायेषुपूर्ववद्याख्येयं॥अभिप्राण्यआघ्रायेत्यर्थः॥अत्रापानश
ब्देनान्नस्यमुखविलादंतःप्रवेशनरूपंनिर्गमनंकुर्वन्नंतर्मुखे
योवायुःसोभिधीयते॥तेनापानेनतदन्नंग्रहीतुमैछत्ततस्तद
न्नमावयज्जयाहग्रसितवान्॥अन्वयव्यतिरेकाभ्यांवायोरेवा
न्नग्रहणसाधनत्वंनिश्चित्यदार्ढ्यार्थंवायुंप्रशंसति॥ ॥सैषोन्नस्य

श्री॰
१८

ग्रहोयद्वायुरन्नायुर्वाएषयद्वायुरिति॥ ॥मुखविलादंतःसंचा
रीवायुरितियदस्तिसएषोन्नस्यग्रहोग्राहकः अयमर्थोस्मदनु
भवसिद्धइत्यर्थः॥किंच॥अयंवायुरन्नायुर्वैअन्नद्वारेणायुष्यहे
तुरेव॥अन्नरसेनहिप्राणोदेहेबध्यतेअतएववाजसनेयिनः
शिशुब्राह्मणेप्राणवर्णनप्रस्तावेन्नंदामेतिवाक्येनान्नस्यप्राण
बंधनरज्जुत्वमामनंति॥तथान्नबंधनशैथिल्येसतिजीवस्य
देहपरित्यागंसदृष्टांतमामनंति॥तद्यथाम्रमौडुंबरंवापिप्प
लंवाबंधनात्प्रमुच्यतएवमेवायंपुरुषएभ्योंगेभ्यःसंप्रमुच्यते

श्री०
१९

तिरन्नबंधनप्रयुक्तस्य प्राणावयस्थानस्यायुर्हेतुत्वंलोकप्रसि
द्धंकौषीतकिनःसमामनंति॥ यावद्यस्मिन्छरीरेप्राणोवसतिता
वदायुरिति॥ तदेतत्सर्वमभिप्रेत्यान्नायुर्वाएषइत्युच्यतेभोगाधि
ष्ठानभोगसाधनभोग्यभोगानांसृष्टिमभिधायभोगस्वामिनंदर्श
यितुमीश्वरस्यविचारमाह॥ ॥सईक्षतकथंन्विदंमदृतेस्यादिति
इति॥ ॥यदिदंदेहेंद्रियतदभिमानिदेवतातदीयान्नतत्स्वीकार
रूपंव्यवहारजातमखिलतदिदंसर्वंमदृतेभोगस्वामिनंजीवरू
पंमांविनाकथंननुनामस्यात्॥ नकथंचिदुपपद्यतेनहिनगरस्वा

श्री०
१९

मिनंराजानंविहायपुरस्यवापौरजनानांवारचनाशोभतेतस्माद्भो
गस्वामिनामयाजीवरूपधारिणादेहेप्रवेष्टव्यमित्यर्थः॥ प्रवेशद्वा
रविचारंदर्शयति॥ ॥सईक्षतकतरेणप्रपद्याइतीति॥ ॥द्वावत्र
प्रवेशमार्गौपादाग्रंमूर्द्धब्रह्मरंध्रंच॥ तयोर्मध्येकतरेणकेनमार्गे
णप्रपद्येप्रविशानिकथन्विदंइतिवाक्येनजीवप्रवेशस्यदेहेंद्रिया
दिव्यवहारपालनरूपंप्रयोजनंविचारितमिदानीमात्मबोधरूप
स्यप्रयोजनांतरस्यविचारंदर्शयति॥ ॥सईक्षतयदिवाचाभि
व्याहृतंयदिप्राणेनाभिप्राणितंयदिचक्षुषादृष्टंयदिश्रोत्रेणश्रुतं

२०

यदित्वचास्पृष्टंयदिमनसाध्यातंयद्यपानेनाभ्यपानितंयदि
शिश्नेनविसृष्टमथकोहमितिइति॥ ॥मांस्वामिनमुपेक्ष्यवागा
दयोभिवदनादिव्यापारेषुस्वतंत्राःकर्त्तारस्युस्तदानीमहंकोवाना
मस्यांनकोपिभवेयंअस्तिकश्चिदेषदेहाव्यतिरिक्तश्चिदात्मास
चपरब्रह्मस्वभावइत्येवंकश्चिदपिनजानीयात्तदात्वहमेवसर्व
व्यापाराणांकर्त्तावागादयस्तुमयाप्रेरिताःसंतोभिवदनादिक्रि
याःकुर्युस्तदानीवागादिकरणकोव्यापारःसकर्तृकोभवितुमर्ह
तिक्रियात्वाल्लोकप्रसिद्धगमनादिक्रियावदिति॥ममसद्भावोनुमा

तुंशक्यतेसोयमनुमानेनात्मसद्भावउपस्तिब्राह्मणेसमाम्नातः॥
यःप्राणेनप्राणितिसतआत्मासर्वांतरइति॥तस्मादात्मबोधोपि
जीवरूपप्रतिचक्षणायेति॥प्रवेशद्वारंदेहेंद्रियादिपालनस्वात्म
वबोधरूपेप्रवेशप्रयोजनेचविचारितवानथप्रवेशंदर्शयति॥॥
एतमेवसीमानंविदार्यैतयाद्वाराप्रापद्यतेति॥ ॥पूर्वत्तुप्रपदाभ्यां
प्रापद्यतेतत्यत्रप्राणरूपक्रियाशक्त्युपाधिकस्यपदाग्रेप्रवेशोभि
हितः॥इदानींज्ञानशक्त्युपाधिकस्यमूर्धमध्यस्थितछिद्रेप्रवेशोभि
धीयते॥यथोक्तविचारोपेतःसपरमेश्वरःसएतमेवमूर्धमध्यभाग

श्री०
२१

मेवकपालसंधिरूपं सीमानं स्थानविशेषं विदार्य छिद्रं कृत्वा तच्छि
द्ररूपया द्वारा ज्ञानशक्तिसहितः सन् देहमध्ये प्राविशत् यस्मात्
ज्ञानोपाधिकस्य मूर्धमध्ये प्रवेशः तस्मान्मूर्ध्नि ज्ञानेंद्रियबाहुल्य
मुपलभ्यते॥ क्रियाशक्त्युपाधिकस्य पादाग्रप्रवेशात् कंठादधो
भागे कर्मेंद्रियबाहुल्यमुपलभ्यते॥ मूर्धगतं प्रवेशद्वारं दर्श
यति॥ ॥सैषा विदृतिर्नाम द्वास्तदेतन्नांदनमिति॥ ॥अक्षिश्रो
त्रादिगोलकानां भृत्यादिस्थानीयैः चक्षुरादींद्रियैरधिष्ठित
त्वात्॥ स्वामिनः स्वस्य प्रवेशार्थमसाधारणं किंचिद्द्वारमपेक्षि

श्री०
२१

तमित्यभिप्रेत्य प्रीतिपूर्वकं विदारितत्वादिकमुत्कर्षं प्रकटि
यितुं तस्य द्वारस्य विदृतिरिति नाम संपन्नं तेन द्वारेण निर्गत
स्य ब्रह्मलोकप्राप्तिद्वारा मुच्यमानत्वादानंदहेतुत्वेन तदेतद्
द्वारं नांदनमित्युच्यते॥ शरीरे प्रविष्टस्य संचारस्थानानि तेष्वव·
स्थाविशेषांश्च दर्शयति॥ तस्य त्रय आवसथास्त्रयः स्वप्ना अ
यमावसथोयमावसथोयमावसथ इति॥ ॥यथा महाराज
स्य क्रीडार्थमुपर्यधोभावेन वर्तमानाः प्रासादस्थं भूमयो निर्मी
यंते एवमस्यात्मनः शरीरमध्ये क्रीडार्थं त्रय आवसथाः त्रीणि

श्री०
२२

स्छाना नि निर्मितानित्रिषुस्थानेषुत्रयः स्वप्नास्तेनात्मनाऽव
लोक्यंतेअयमावसथइत्यादिनानेत्रकंठहृदयाख्यानिस्छा
नानिहस्ताग्रेणदृश्यंतेतेषुहिजायदाद्यवनिष्पस्थानां निष्प
त्तिः॥ तथाचश्रुतिः॥ नेत्रस्थंजागरितंविद्यात्कंठेस्वप्नंसमावि
शेत्॥ सुषुप्तंहृदयस्छंतुतुरीयंमूर्धनिस्छितं॥ जागरितादी
नांमहाराजस्यप्रासादत्रयेक्रीडावज्जीवक्रीडास्थानत्वं॥ तथा
०श्रु०॥ स्त्र्यन्नपानादिविचित्रमिति॥ ननुजागरणसुषुप्तयोः
स्वप्नादन्यत्वेत्वयःस्वप्नाइत्युक्तमितिचेन्न॥ स्वप्नलक्षणोपेत

श्री०
२२

त्वात्॥ विद्यमानंवस्तुतत्वंतिरोधायसमुत्पन्नोन्यथाप्रति
भासः स्वप्नइतितल्लक्षणं॥ जागरणसुषुप्तयोरपिविद्यमा
नस्यब्रह्मतत्वस्यतिरोधानेनअन्यथाभूतस्यजीवत्वस्य
चावभासइत्यस्तिलक्षणं॥ तस्माल्लोकप्रसिद्धस्यस्वप्नस्यै
कत्वेपिलक्षणसिद्धाः॥ स्वप्नास्त्रयः॥ अयआवसथइत्यने
नपितृशरीरमातृशरीररूपाणिवाचीणिस्थानानिलक्ष्यं
ते॥ तथाचोपरितनाध्यायेप्रपंचयिष्यते॥ संसारो द्विविधः॥
दैनंदिनव्यवहारोजन्मांतरस्वीकारश्चेति॥ तत्रदैनंदिनव्यव

श्री० हारस्यनेचादीनिस्थानानिजन्मांतरव्यवहारस्यपिपित्
२३ मात्स्वीयशरीराणिस्थानानीतिविवेकः॥इतिशब्दः संसा
ररूपस्याध्यारोपप्रकरणस्यसमाप्त्यर्थः॥अथापवादप्रक
रणार्थंसंक्षिप्यंदर्शयति॥ ॥सजातोभूतान्यभिव्येरव्याक्
मिहान्यंवावदिषदितिसएतमेवपुरुषंब्रह्मततमपश्य
दिति॥ ॥सपरमात्माजातोदेहप्रवेशेनजन्ममरणजाग्र
त्स्वप्नसुषुप्तिभिः संसारीभूतः सन्कदाचिदीश्वरानुग्र श्री०
हाद्गुरुशास्त्रप्रसादेनचभूतान्याकाशादीनिप्राणिनश्चाभि २३

व्येरव्यत्सर्वतोविवेकेनज्ञातवान्॥दृश्यमानान्याकाशा
दीनिप्राणिदेहाश्चकुतउत्पद्यंतेकेनवारक्ष्यंतेकस्मिन्वा
प्रलीयंतइत्येवंशास्त्रंविविच्यसर्वस्यसंसारस्यमायाक
ल्पितत्वाद्ब्रह्मैवसर्वस्याधिवस्तुतत्वंतस्मादिहजगति॥
किंवावरत्कब्रह्मणोन्यद्भावद्विषद्वदिष्यामि॥नकिंचिदपि
ब्रह्मव्यतिरिक्ततयावक्तुंशक्नोमीतिनिश्चित्यसजीवएत
मेवशरीरेप्रविष्टंपुरुषंचिद्रूपंदेहादिसाक्षिणंब्रह्मअप
श्यत्ब्रह्मत्वेननिश्चितवान्।कीदृशंब्रह्मततमेमेकत्तका

श्री०
२४

रोत्तमः अतिशयेनततं विस्तृतंततत्तमंदृश्यस्यसर्वस्य
जगतोद्रष्टुर्जीवस्यचब्रह्मैवतत्त्वमित्यपवादप्रकरणस्य
सर्वस्यतात्पर्यार्थः॥ यथोक्तब्रह्मसाक्षात्कारंनामनिर्वच
नेनप्रशंसति॥ इदमदर्शमिती३॥ तस्मादिदंद्रोनामेदंद्रो
हवैनामतमिदंद्रंसंतमिंद्रमित्याचक्षतेपरोक्षेणपरोक्ष
प्रियाइवहिदेवाः परोक्षप्रियाइवहिदेवाइति शरीरेप्रवि
ष्टः सञ्जीवात्माब्रह्मात्मत्वंसाक्षात्कृत्यइदमदर्शमितिवा
क्येनस्वकीयमपरोक्षानुभवंप्रकटयन्परितुतोष॥ परितो

श्री०
२४

षद्योतनार्थात्प्लुतिः यस्मादिदमदर्शमित्युक्तवान्तस्मादिदं
दृष्टमित्यनयैववस्तुप्रत्यासोयमिदंइदंपश्यतीतिदंद्रः इदंद्रइ
तिनामप्राप्तवान्तस्यनाम्नोनिर्वचनानुसारेणयोग्यत्वप्रसि
द्धंद्योतयितुमिदंद्रोहवैनामेत्युक्तं॥ अत्रलोकेपरमेश्वरमिदं
द्रइत्येवंव्यवहरंतिनत्विदंद्रमितिशंकनीयं॥ परमार्थतोय
थोक्तरित्येदंद्रमेवसंतंपरोक्षत्वार्थमेकमक्षरंविलोप्येंद्र
इत्येवंव्याहृतवान्नापिपरोक्षत्वेवैयर्थ्यंशंकनीयं॥ यस्मा
द्देवाः पूज्याः सर्वेस्वकीयंनामगूढंकृत्वोपाध्यायाचार्यइ

श्री०
२५

त्यादिकेपरोक्षनामन्येवप्रीतिंकुर्वंति॥हिशब्देनास्मिन्नर्थे
लोकप्रसिद्धिर्दर्शिता॥अभ्यासोध्यायसमाप्त्यर्थः॥ ॥
इतिसायणाचार्यविरचितेमाधवीयेवेदार्थप्रकाशेएतरे
यद्वितीयारण्यकेचतुर्थोध्यायः॥ अध्यारोपापवादा
भ्यांनिष्प्रपंचंप्रपंच्यतइतिपूर्वाचार्यैः कृत्स्नवेदांतानांता
त्पर्यंसंगृहीतंतदेवात्रचतुर्थेध्यायेविस्पष्टमुदीरितम्।
त्मावाइदमेकएवाग्रआसीन्नान्यत्किंचनमिषदित्येत
न्निःप्रपंचब्रह्मात्मतत्वस्यप्रतिपादकंसूत्रं॥तस्यसू

श्री०
२५

त्रस्यार्थमवबोधयितुंसईक्षतलोकान्नुसृजाइत्यार
भ्यायमावसथइत्यंतेनग्रंथेनकृत्स्नप्रपंचस्याध्यारो
पः प्रतिपादितः॥ब्रह्मांडस्यमध्येयेएतेचतुर्दशलोका
यश्चताल्लोकानात्मशरीरत्वेनाभिमन्यमानोभिमन्य
तेसावभिमन्यमानोविराट्पुरुषःयानिचतद्देहच्छिद्रे
षुउक्तानिवाक्चक्षुरादीनियाश्चतदभिमानिन्योग्नि
वाय्वादित्यादिदेवताःयानिचतासांदेवतानांभोगयो
ग्यानिमनुष्यादिशरीराणियच्चतेषुशरीरेषुप्रविष्टा

।नांदेवतानामन्नंयश्चवायुर्नैवतदन्नस्वीकारः यदपिजीव
रूपेणतेषुदेहेषुप्रविश्यजाग्रदाद्यवस्थात्रयस्यशरीरां
तरसंचारस्यानुभवनंसोयंसर्वोप्यद्वितीयेपरमात्मन्यध्या
रोपितःप्रपंचः सचात्मावबोधोपियोग्यः एतेन द्विजग
दंकुसेणतन्मूलमात्मतत्वमसीदित्यनुमंतुंशक्यं॥एत
देवाभिप्रेत्यछंदोगाआमनंति।अन्नेनसोम्यशुं०तिष्ठाद्
तितदेवमध्यारोपेणाद्वितीयस्यात्मतत्वस्यास्तित्वमात्रं
सिद्धं॥तस्याध्यारोपस्यापवादेनतत्वस्येत्थंभावोवगंतुंश

क्यते॥तस्मात्सजातोभूतानीत्यारभ्यपरोक्षप्रियाइवहि
देवाइत्यंतेनग्रंथेनअध्यारोपस्यापवादःसंगृहीतः॥
तत्राध्यारोपवादेतस्यत्रयआवसथाइतिवाक्येनशरी
रसंचारोपिसंग्रहेणप्रतिपादितः॥तदेतत्पितृशरीरं
स्वात्मशरीरमित्येतदावसथत्रयंपंचमाध्यायेविवरि
ष्यतेतत्रादौपितृशरीरमावसथंदर्शयति॥ ॥पुरुषेह
वाअयमादितोगर्भोभवतियदेतद्रेतइतियोयंशरीरंवि
जिघृक्षुःगृहीतुमिच्छुःजीवात्मासोयंपुरुषेपितृशरीरे

(27)

श्री॰
२७

प्रथमोगर्भोभवति॥ नतुचस्त्रीगर्भवदुदरदृष्ध्यासोभिव्यज्यतो किंतुयदेतत्पितृशरीरेसप्तमधातुरूपंरेतोस्तितदेवगर्भइत्युच्यते॥ तस्मिन्रेतसिजनिष्यमाणस्यजीवस्यप्रविष्टात्॥ स्वर्गाद्वानरकाद्वावृष्टिद्वाराभूमौसमागतोजीवोलिंगशरीरंव्रीहियवाद्यन्नद्वारापितृशरीरेप्रविशति॥ एतच्चपंचाग्निविद्यायांप्रपंचेनाम्नातंतस्मिंश्चपुरुषेशरीरेअन्नरसशोणितमांसादिक्रमेणपरिणतेरेतस्यवस्थितोभवतिसोयंपुरुषेगर्भइत्युच्यतेतस्यगर्भस्यजन्मप्रकारं

श्री॰
२७

दर्शयति॥ तदेतत्सर्वेभ्योंगेभ्यस्तेजःसंभूतमात्मन्येवात्मानंबिभर्तितद्यदास्त्रियांसिंचत्यथैनज्जनयतितदस्यप्रथमंजन्मेति॥ ॥पुरुषेगर्भत्वेनव्यवस्थितंयदेतद्रेतोस्तितदेतत्तस्मिन्पुरुषशरीरेआपादमस्तकंसर्वेभ्योवयवेभ्यःसारभूतंयत्संभूतंनिर्गतंभवतितच्चसर्वावयवनिर्गतंरेतोभूतसारमात्मानस्वस्यैरूपांतरभूतमात्मन्येवशरीरेएवासोपुरुषोबिभर्तिपोषयतितत्पोषितरेतोग्निसंपर्केणघृतमिवकामाग्निनाविलीनेसत्हृदयेसमागत्यव्यवस्थितं

भवतितादृशंरेतोयदाऋतुकालीनेनगमनेनस्त्रियां
स्त्रीयोनौगर्भाशयेसिंचतिअथतदानीमयंपुरुषएतज्जी
वांतराविष्टंरेतोरूपंशरीरंजनयतितदेतद्रेतोनिःसर
णरूपमस्यरेतस्यवस्थितस्यसंसारिणोजीवस्यप्रथ
मंजन्मेत्युच्यते॥तस्यचत्रयआवसथाइत्युक्तानांमध्ये
प्रथमादावसथात्पितृशरीररूपात्संपन्नमितिकृत्वा
प्रथमंजन्मभवति॥ननुस्त्रीशरीरेप्रविष्टंपरकीयंरेतः
स्त्रियाउपद्रवकारिस्यात्शरीरलग्नबाणादिवदित्याशं

क्याह॥ ॥तत्स्त्रिया आत्मभूयंगच्छतियथास्वमंगंतथा
तस्मादेनांनहिनस्ति॥इति॥ स्त्रीयोनौप्रविष्टंतत्पुरुष
रेतः तस्यास्त्रियआत्मभूयंआत्मस्वरूपंस्वशरीरभा
वगच्छतियथास्वकीयमंगंस्तनहस्तादिकंनशरीरा
त्पृथग्भूतंतस्मात्स्वशरीरत्वेनैकीभावकरणादेनांस्त्रि
यंनहिनस्तिउदरलग्नबाणवद्धिंसांनकरोति॥तद्गर्भ
द्वारेणस्त्रीपुरुषयोःपरस्परमुपकार्योपकारकभावंदर्श
यति॥ ॥सास्यैतमात्मानमत्रगतंभावयतिसाभावयित्री

भावयितव्या भवतीति॥ ॥सा गर्भधारिणी स्त्री अत्र गतं स्वश
रीरप्रविष्टमस्य पुरुषस्य रेतः सेकं पुरेतमात्मानं पुरुषरूपं भा
वयति परिपालयति॥ विरुद्धाशनादिपरित्यागोनुकूलान्ना
द्युपभोगश्च परिपालनं॥ तस्मात्सा स्त्री गर्भपालनभावयि
त्री पुरुषस्यैव पालयित्री॥ तस्मात्कारणात्तेन पुरुषेण सा स्त्री
भावयितव्या अभीष्टान्नपानवस्त्रादिप्रदानेन पालयितव्या
भवति॥ स्त्रीपुरुषयोरुभयोरपि पुत्रं प्रत्युपकारत्वं दर्शयति॥
तं स्त्री गर्भं बिभर्त्ति सोग्र एव कुमारं जन्मनोग्रेधि भावयतीति॥

तं पुरुषरूपं गर्भं मातृरूपा स्त्री महांतं प्रयासं सोढ्वा नव दश
मासान्स्वोदरे धारयित्वा पोषयति स एव पिता अग्र एव प्र
सवाग्र एव प्रागेव निष्पन्नं कुमारं जन्मनोग्रे प्रसवादूर्ध्वम
धिभावयत्यधिकत्वेन शास्त्रीयजातकर्मादिना संस्कारं क
रोति॥ कुमारसंस्कारेण पितुरुपयोगं दर्शयति स यत्कुमा
रं जन्मनोग्रेधि पुत्रस्य स्वदेहत्वात्॥ तथा चान्यच्छ्रूयते॥ प
तिर्जायां प्रविशति गर्भो भूत्वा स मातरं॥ तस्यां पुनर्नवो भूत्वा
दशमे मासि जायते इति॥ आत्मा वै पुत्रनामासीति च॥ ननु

श्री० पुरुषस्योपनयनादिनास्वकीयः संस्कारः पूर्वमेवसंपन्नः किम
उ० नेनपुत्रसंस्कारेणपुत्रोत्पादनेन चेत्यतआह॥ एषांल्लोकानां
संतत्याएवंसंतताहीमेल्लोकाइति॥ ॥पुत्रपौत्रप्रपौत्रादयइ
मेजनाल्लोकास्तेषांल्लोकानामविछेदायसंस्कृतपुत्रोत्पाद
नं॥ अनेनपित्रास्वोत्पादितेपुत्रेसंस्कृतेसतितथैवपुत्रोप्य
न्यंपुत्रमुत्पाद्यसंस्करोतिसोप्यन्यंपुत्रमित्येवमेवैमेलो
काअविछिन्नाभवंत्यन्यथाविछिद्येरन्मातृशरीरान्नि श्री०
र्गमस्यपूर्वोक्तजन्मापेक्षयाद्वितीयत्वदर्शयति॥ ॥तदस्य उ०

द्वितीयंजन्मेति॥ जनकस्यपुत्रप्रयुक्तमुपयोगंदर्शय
ति॥ सोस्यायमात्मापुण्येभ्यः कर्मभ्यः प्रतिधीयतइति॥
अस्यपितुर्द्वविात्मनोदेहौतयोर्मध्येअयमात्मापुत्ररूपो
देहः पुण्येभ्यः कर्मभ्यः शास्त्रोक्तकर्मनिष्पादनार्थंप्रतीधीय
तेस्वस्यप्रतिनिधित्वेनगृहेसंस्थाप्यते॥ ननुकिमनेनप्रति
निधिना॥ स्वयमेवकुतोनकरोतीत्यतआह॥ अथास्यायमि
तरआत्माकृतकृत्योवयोगतः प्रैतीति॥ ॥अस्यपितुरितर
आत्मास्थविरोदेहः कृतकृत्यःकृतान्येतज्जन्मप्रयुक्तानिक

श्री०
३१

त्यानिसर्वाणीत्यसौकृतकृत्यःलौकिकानांकुटुंबपोषणादी
नांशास्त्रीयाणामग्निहोत्रादीनांचनिष्पादितत्वात्कृतकृ
त्यत्वं॥वयोगतोवयसापूर्वकर्मसंपादितेनायुषाहीनःप्रैति
म्रियतेअतःपुत्रदेहेनैवपुण्यंकर्तव्यंनतुमृतेनपितृदेहेन
कर्तुंशक्यं॥पूर्वोक्तजन्मद्वयमपेक्ष्यजन्मांतरंदर्शयति॥
सइतःप्रयन्नेवपुनर्जायतेतदस्यतृतीयंजन्मेति॥ सइ
तःपितोइतोऽस्मात्॥जरठदेहात्प्रयन्नेवनिर्गच्छन्नेवस्वर्गे
नरकेमनुष्यलोकेवास्वकर्मानुसारेणपुनर्जायते॥नत्वस्मा

श्री०
३१

स्माद्देहान्निष्क्रांतस्यजन्मांतरायकालव्यवधानमस्त्यस्मि
न्नेवशरीरेस्थित्वामनसोदेहांतरंस्वीकृत्यपश्चादमुंदेहंपरि
त्यजतियथाजलौकासुखेनतृणांतरमवष्टभ्यततःपृष्ठ
भागमुपसंहरतितद्वत्॥तथाचवाजसनेयिनःसमामनं
ति॥तद्यथातृणजलायुकातृणस्यांतंगत्वान्यमाक्रममाक्र
म्यात्मानमुपसंहरत्येवमेवायमात्मेदंशरीरंनिहत्याविद्यांग
मयित्वान्यमाक्रममाक्रम्यात्मानमुपसंहरति॥यथोक्तं
पुनर्जननरूपमस्यसंसारिणआत्मनस्तृतीयंजन्मेत्युच्य

श्री० ३२

तेयद्यपिपूर्वोक्तिजन्मद्वयंपुत्रदेहस्य॥इदंतुदेहांतरस्यतथापि
पितृपुत्रोपाध्योरेवभिन्नत्वादुपाध्युपलक्षितस्यात्मनएकत्व
मभिप्रेत्यैकस्यजन्मत्रयमित्युपचर्यते॥यद्वापितुःसकाशाद्रे
तोरूपेणमातुःसकाशात्कुमाररूपेणपुत्रेयज्जन्मद्वयमु
दाहृतंतेनैवन्यायेनापितुरपिस्वकीयपितृमातृसकाशाज्ज
न्मद्वयमर्थादुक्तमेवेत्यभिप्रेत्यतदपेक्षयापितुरिदंतृतीयंज
न्मद्वयंसाक्षाद्दृष्टपितृदृष्टांतेनवमरणादूर्ध्वंतृतीयजन्मभवि
ष्यति॥एवंसर्वस्यापित्रयःपुनरावर्त्तंते॥अनेनजन्मत्रयोपव

श्री० ३२

र्णनेनसंसाराद्विरक्तिरुपजायते॥नहिमातापितृमलद्वयरू
पदेहस्यनिरंतरंधारणादन्यदधिकंजुगुप्सितंवैराग्यका
रणमुदाहर्त्तुंशक्यं॥मतएवविष्णुपुराणेपठयते॥स्वदेहा
शुचिगंधेननविरज्येतयःपुमान्॥विरागकारणंतस्यकिम
न्यदुपदिश्यते॥तस्यैतस्यजुगुप्सितस्यसंसारस्यज्ञानम
तरेणविनाशाभावंतत्वज्ञानेननिवृत्तिंचद्योतयितुंमंत्रमुदा
हरंति॥तदुक्तमृषिणेति॥पुरुषेहवेत्यारभ्यतृतीयंजन्मेत्यै
तेनग्रंथेनसंसारस्ययत्कुत्सितत्वमुपवर्णितंयच्चसंसारनिव

र्मेकं तत्वज्ञानमुत्तरत्र विवक्षितं तदुभयगर्भेनुमातृगर्भे एवा
वस्थितः सन्नेषामग्निवाय्वादित्यानां देवानां विश्वानि जनिमा
नि सर्वाण्यपि जन्मान्यत्र वेदमनुक्रमेण विदितवानस्मि॥ मुखा
द्वाग्वाचो ग्निरित्यादिश्रुतिप्रतिपादितं परमात्मना संपादितं॥
देवानां जन्मज्ञातवानस्म्योपनिषदमात्मज्ञानं मम संपन्नमि
त्यर्थः॥ अथ एतस्मादात्मज्ञानोदयाद धस्तान्मां वामदेवमाय
सीर्लोहनिर्मितग्रंखलासमानाः शतं पुरः शतसंख्याकानि
शरीराण्यरक्षन्नयथा कारागृहे अवस्थापितं तस्करं प्रलंबद्ध

ग्रंखलापलायनाद्रक्षंत्येवशतसंख्यो पलक्षितान्यनंतानि
शरीराणि यथाहं मुक्तो न भवामि तथैवारक्षन्निदानीं गुरुशा
स्त्रप्रसादाल्लब्धतत्व विद्यायुक्तः अविद्यामायाख्यात्संसा
राच्छ्येन इव जालं भित्वा जवसा निरदीयं त्वरया निर्गतोस्मीति
शब्दो मंत्रसमाप्त्यर्थः॥ अस्य मंत्रस्य तात्पर्य्यं दर्शयति॥ ग
र्भ एवैतच्छयानो वामदेव एवमुवाच स एवं विद्वानस्माच्छरी
रभेदादूर्ध्व उत्क्रम्यामुष्मिन्स्वर्गे लोके सर्वान्कामानाप्त्वाम्
तः समभवत्समभवत्॥ ॥ अहमितिमंत्रेयोभिहितः स वाम

श्री० देवोमातृगर्भएवशयानः सन्नेतस्मैवोक्तमंत्रार्थजातमेवज्ञा
३४ तवानसवामदेवएवंमंत्रोक्तप्रकारेणात्मतत्वंविद्वान्प्रारब्ध
कर्मणिक्षीणसत्यस्माच्छरीरभेदाद्देहविनाशादूर्ध्वउत्तरकाले
अवस्थितः सर्वस्मात्संसारबंधनादुत्क्रम्यामुष्मिन्निर्द्वियागो
चरेस्वर्गेसुष्ठुतत्वज्ञानार्जितेलोकेस्वप्रकाशेनावलोक्यमा
नेस्वरूपेसर्वान्कामान्तैत्तिरियकेप्रोक्तान्सार्वभौमादिहि
रण्यगर्भपर्यंतगतान्सर्वानानंदानाप्त्वापरमानंदस्वरूपब्र श्री०
ह्मात्मत्वेनप्राप्यामृतोमरणरहितः समभवत्॥ यद्यपिगर्भेगु ३४

रुशास्त्रोपदेशोनास्तितथापिजन्मांतरोपदेशस्यकेनचित्प्रब
लकर्मणातदानींप्रतिबंधस्यगर्भेप्रतिबंधक्षयमपेक्ष्यज्ञानो
त्पादकत्वंसंभवति॥ तथाचभगवताव्यासेनसूत्रितं॥ ऐहिक
मप्रस्तुतप्रतिबंधेतद्दर्शनादिति॥ प्रस्तुतप्रतिबंधाभावेसति
यस्मिन्जन्मन्युपदेशस्तस्मिन्नेवजन्मनिज्ञानंभवत्यथवाज
न्मांतरे॥ कुतो॥ वामदेवतद्दर्शनादितिसूत्रार्थः॥ यद्यपिमुक्तो
कामादिविषयानंदाः नसंतितथापिविषयानंदानांब्रह्मानंद
लेशत्वेनतस्मिन्नंतर्भावात्॥ ब्रह्मानंदप्राप्त्यासर्वकामप्राप्ति

रूपचर्यते॥ तत्त्वज्ञानिनो वर्त्तमानदेहपातदूर्ध्वं देहांतरसंबंध
स्याभावेन देहप्राणवियोगरूपस्य मरणस्याप्रसक्तत्वादमृ
तत्वं द्रष्टव्यं समभवदिति हितएयककांडे द्वितीयोपनिषत्सु पंच
मोध्यायः॥ ॥अध्यारोपप्रकरणे तस्य त्रय आवसथा इतिवाक्ये
न पितृमातृस्वशरीररूपसंसरणार्थस्थानत्रयं यदुक्तं तत्पुनः
पंचमाध्याये वैराग्योत्पत्यर्थं पुरुषे ह वा इत्यादिना प्रपंचितं सजा
तो भूतान्यभिव्यैख्यदित्यादिनाऽपवादप्रकरणेन यत्तत्त्वज्ञानं
संगृहीतं यच्च वामदेवोदाहरणेन ज्ञानफलं संक्षिप्य दर्शितं तदु

भयं विशदीकर्तुं षष्ठोध्याय आरभ्यते तत्रात्मा वा इदमित्याद्यध्या
येन सामान्यतस्तत्त्वमवगत्य पुरुषे ह वा इत्यध्यायोक्तजन्मक्ले
शविचारेण परं वैराग्यं प्राप्तानां जिज्ञासूनां विचारं दर्शयति॥
कोयमात्मेति वयमुपास्महे कतरः स आत्मेति॥ आत्मा वा इदमि
ति श्रुतो कश्चिन्निरुपाधिक आत्मा श्रुतः तथा स एतमेव सी
मानमिति कश्चित्सोपाधिक आत्मा श्रुतः वयं तु प्रतिदिनं प्रति
क्षणमात्मेति वयमुपास्महे स कः सोपाधिको निरुपाधिको वे
त्यर्थः औपासनं नाम नैरंतर्येण तात्पर्यपुरःसरो व्यवहारः अ

36

श्री०
३६

हंगच्छाम्यहमागच्छामिममायंदेहोममेदंगृहमितिनिरंत
रमादरेणात्मव्यवहारोलोकेदृश्यतेसोयमत्रोपासनत्वे
नोपचर्यते॥तथासआत्माश्रुतावात्मेत्यादिनाश्रुतःकत
रःसोपाधिकयोर्मध्येकतरःकोसावित्यर्थःननुकतरःस
आत्मेत्ययंविचारोस्तुश्रुत्यैकगम्यस्यतस्यविचारमंतरे
णानिश्चयात्कोयमात्मेत्ययंतुविचारोनयुक्तस्तस्याहंप्र
त्ययगम्यत्वेनप्रसिद्धत्वादित्याशंक्यविचारहेतुमनेकको
ट्यासंशयंदर्शयति॥ येनवापश्यतियेनवाशृणो

श्री०
३६

शृणोतियेनवागंधानाजिघ्रतियेनवावाचव्याकरोतियेन
वास्वादुचास्वादुचविजानातिपदेतद्धृदयंमनश्चैतत्संज्ञा
नंविज्ञानंप्रज्ञानंमेधादृष्टिर्धृतिर्मतिर्मनीषाजूतिःस्मृतिः
संकल्पःक्रतुरसुःकामोवशइतिइति॥ ॥यद्यप्यहंप्रत्यय
गम्यश्चैतन्यरूपआत्मेतिसामान्याकारेणप्रसिद्धिरस्तित
थापितद्विशेषेसंशयोविद्यतेबाह्यांतःकरणेषुसर्वेष्वपिचै
तन्यपृथक्पृथगभिव्यज्यतेयथाजलपात्रेषुप्रत्येकंसूर्या
दिप्रतिबिंबस्तद्वत्तथासतिचक्षुरिंद्रियाभिव्यक्तचैतन्येन

श्री० ३७

देहेंद्रियसंघाताभिमानी लौकीकः पुरुषो नीलपीतादिरूपं पश्यति सर्तो येनवा चाक्षुषा चैतन्येन पश्यति तच्चैतन्यं किमात्मेत्येका कोटिः तथा येन श्रोत्राभिव्यक्ति चैतन्येन शब्दं शृणोति तत्किमात्मेति द्वितीया कोटिरेवं घ्राणवाग्जिह्वादींद्रियाभिव्यक्तचैतन्ये विशेषणात्मतत्वस्वरूपसंदेहकोटित्वं द्रष्टत्वं चैतन्यस्यैव स्वरूपरसादिज्ञापकत्वं कठवल्लिकायाम्नायते॥ येन रूपं रसं गंधमिति०॥ श्रोत्रादींद्रियद्वाराशाखाभेदयोपनिषद्भिर्विषयग्राहकत्वमभिप्रेत्य तलवकारेरप्या

म्नायते॥ श्रोत्रस्य श्रोत्रमनसो० वाजसनेयिनोपि तत्तादिंद्रियसाक्षिचैतन्येन तत्तदिंद्रियद्वारकविषयग्रहणमभिप्रेत्य तत्तदिंद्रियनाम्ना व्यवहारमामनंति प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुरिति॥ बाह्येंद्रियमभिव्यक्तचैतन्ये षात्मतत्वसंशयमभिप्रेत्य यदेतद्धृदयमित्यादिना तत्तदुपाधिस्वरूपमुपन्यस्य तेनत्र हृदयं बुद्धिः सा चात्मनो विषयसंकल्पादिसाधनं मन इत्युच्यते बुद्धिर्मनसो द्वयोरेतः करणविषयोः समुच्चया

श्री० ३८

र्थश्च कारणएतदेवांतःकरणद्वैविध्यमभिप्रेत्यतैत्तिरीयके॥त
स्माद्वाएतस्मान्मनोमयात्॥अन्योतरआत्माविज्ञानमयइति
कोशद्वयमुपन्यस्तंतस्यचमनोवृत्तिविशेषाःएतत्संज्ञानमित्या
दिनाप्रपंच्यतेयन्मनोस्तिएतदेववृत्तिरूपेणपरिणतंतत्सं
ज्ञानमित्युच्यतेसम्यगिदंवस्त्वितिज्ञप्तिःसंज्ञानमाज्ञानमाज्ञ
भिरीश्वरभावःविज्ञानमिदमस्माद्विशिष्टमित्येवमादिविवेकः
प्रज्ञानंग्रंथार्थादौतुन्मेषःस्फूर्तिःमेधाग्रंथतदर्थधारणंदृष्टि
श्चक्षुर्द्वारारूपोपलब्धिहेतुर्मनोवृत्तिर्धृतिःधैर्यप्राज्ञायामध्या

श्री० ३८

पदितद्विषयगणनाशाद्दित्यंमतिर्मननराजकार्याद्यालोचनंम
नीषातत्रस्वातंत्र्यंजूतिर्जवःप्राप्तकार्येषुराजकार्येषुमनसो
व्यग्रतायद्वाज्जूतिर्मनसोरोगादिजनितदुःखित्वंस्मृतिरनुभू
तार्थवस्तुस्मरणंसंकल्पोसमीचीनेपिवस्तुनिसम्यक्त्वेनक
ल्पनंकर्त्तुरवश्यकरीष्यामीत्यध्यवसायोनिश्चयोनिश्चयःअ
सुःप्राणापानादिजीवनक्रियानिमित्तावृत्तिःकामोसंनिहितविष
याकांक्षावशःस्त्रीव्यतिकराद्यभिलाषःइतिशब्दःप्रदर्शनार्थः
इत्येवमाद्याअन्येपिसात्विकादिवृत्तिभेदाबहवोद्रष्टव्याःअत्र

३९

श्री० ३९

सर्वत्र किमेतद्दृत्युपहितं चैतन्यमात्मेत्येवं संशयकोटियोयोजनी
याः इत्थं संशयमुपन्यस्य निर्णयं दर्शयति॥ ॥सर्वाण्येवैतानि
प्रज्ञानस्य नामधेयानि भवंतीति॥ ॥येनवापश्यतीत्यादिनाक्र
तुरसुः कामोवश इत्यंतेन ग्रंथेन यान्युपन्यस्तान्येतानि सर्वाण्य
पि तत्तद्दृत्युपाधिद्वारा तदुपलक्षितस्य प्रज्ञानस्य शुद्धचैतन्यस्य
नामधेयानि संपद्यंते प्रकृष्टं ज्ञानं प्रज्ञानं चैतन्यं हि स्वतो निर्मल
त्वात्प्रकृष्टमेवत्अधमोपाधिसंपर्कवशात्अपकर्षः प्रतीयते
यदारूपाधिविशिष्टत्वं परित्यज्य तत्तदुपाधिभिरुपलक्षितं शा

श्री० ३९

खाचंद्रन्यायेन विविच्यते ज्ञायते तत्तदानीमुपाधिकृतस्या
पकर्षाभावात्प्रकर्षेणैव तिष्ठति परिशिष्यते तच्च प्रकृष्टं चैतन्य
सर्वेष्वप्युपाधिष्वनुगतमिति कृत्वा तस्यैव मुख्यमात्मत्वमिति नि
र्णयः उपाधिविशिष्टस्य न मुख्यमात्मत्वं शुद्धचैतन्यस्यैव मुख्य
मात्मत्वमिति अयमेव विवेको बृहदारण्यके स एष इह प्रविष्ट इ
त्यादिना प्रविष्टं जीवात्मानं प्रकृत्याएवमाम्नायते तन्न पश्यति
कृत्स्नो हि स प्राणन्नेव प्राणो नाम भवति वदन्वाक् पश्यंश्चक्षुः शृ
ण्वन्श्रोत्रं मन्वानो मनस्तान्यस्यैतानि कर्मनामान्येवेति अयमर्थः॥

(५०)

श्री० देहेनखाग्रपर्यंतंप्रविष्टंज्ञानक्रियाशक्त्युपाधिकंतमात्मानंविवेकि
४० नःपुरुषाःस्वात्मतयानपश्यंतियस्मात्सआत्मोपाधिविशिष्टःकृत्स्नो
नभवतितस्मान्नमुख्यात्मत्वमकृत्स्नत्वमेवकुतइतिचेत्तदुच्यतेप्रा
एंनेवाम्वासंकुर्वन्नेवप्राणोपाधिविनोशिष्टेतरत्रनानुगछत्यभिव
दनकालेएववागाद्युपाधिकःरूपदर्शनकालएवचक्षुरुपाधिकः
एवमितरत्रापिकथंतर्ह्यात्मनःकृत्स्नत्वमित्याकांक्षायांप्राणवागा
द्युपाधिविशिष्टपरित्यागेनसिद्धत्वमित्ययमर्थोबृहदारण्यकेए श्री०
वमाम्नातःआत्मेत्येवोपासितेत्यत्रह्येकेसर्वएकंभवंतीतियेवागा ४०

द्युपाधिषुचैतन्यविशेषास्तेसर्वेनिरुपाधिकआत्मन्यंतर्भवंत्य
थाजलपात्रगताःसर्वेपितत्कल्पनाधिष्ठानभूतेमुख्येसूर्यंत
र्भवंतितद्वत्तद्देवंकोयमात्मेत्येतस्मिंस्त्वंपदार्थविचारेनिरुपाधि
कंसाक्षिचैतन्यंप्रज्ञानशब्दाभिधेयमात्मेतिनिर्णयोभिहितःअ
थकतरःसआत्मेत्येतस्मिंस्तत्पदार्थविचारेनिर्णयंदर्शयति॥ ॥
ऐषब्रह्मैषइंद्रएषप्रजापतिरेतेसर्वेदेवाइमानिचपंचमहाभूता
निपृथिवीवायुराकाशआपोज्योतींषीत्येतानीमानिचक्षुद्रमि
श्राणिबीजानीतराणिचेतराणिचेतराणिचांडजानिचजारजा

(५१)

श्री० ४१

निचस्वेदजानिचोद्भिज्जानिचाश्वागावः पुरुषाहस्तिनोयत्किं
चेदंप्राणिजंगमंचपतत्रिचयच्चस्थावरंसर्वंतत्प्रज्ञाननेत्रमि
ति॥ ब्रह्मादिस्थावरांतंयज्जगदस्तितत्सर्वंप्रज्ञानेत्रंनिरुपाधि
कत्वेनप्रकृष्टाज्ञप्तिः प्रज्ञानीयतेज्ञायंतेसर्वंजगदनेनेतिसृष्टि
स्थितिप्रलयव्यवहाराणांमूलकारणंनेत्रंप्रज्ञैवनेत्रंयस्यज
गतस्तत्प्रज्ञानेत्रंअशेषजगतोमूलकारणभूतंयच्चैतन्यंत
देवकर्तरः सआत्मेत्यस्मिंस्तत्पदार्थविचारेमुख्यात्मत्वेननि
र्णेतव्यमितितात्पर्यार्थः एषब्रह्मेत्यनेनपुल्लिंगेनब्रह्मशब्देनहि

श्री० ४१

रण्यगर्भः समवर्त्ततायेइत्यादिशास्त्रसिद्धः प्रथमशरीरीवि
वक्षितस्तस्यशास्त्रप्रसिद्धिंद्योतयितुमेतच्छब्दः इंद्रोदेवराजः
प्रजापतिः पूर्वोक्तोंद्रियतदभिमानिदेवतोत्पादकोविराट्देहः
सर्वेदेवाअग्निवाय्वादयः पृथिव्यादीनिपंचमहाभूतानिप्रसि
द्धानिपंचमहाभूतानीत्येतस्यवाक्यस्यपृथिवीत्यारभ्येत्येता
नीत्यंतंविवरणंइमानिचान्यानिक्षुद्रैरल्पकैर्मशकपिपीलि
कादिदेहैर्मिश्राणिइवशब्दोनर्थकः बीजानिकारणानिमनु
ष्यादिपिपीलिकांताः सर्वेदेहाः स्वयंपंचमहाभूतकार्यभूताः

(42)

श्री०
४२

संतोपुत्रादिसजातीयदेहांतरहेतुत्वेनबीजशद्याभिधेयंतेषांबीजानिनानाजातीयनेतराणिचेत्यनेनप्रतिज्ञायतेपरस्परविलक्षणबहुभेदयुक्तानीत्यर्थः अंडजानीत्यादिनाप्रतिज्ञातमेवज्ञानात्वप्रपंचतेअंडजानिपक्षिसर्पादीनिजारुजानिगर्भाशजरायुःपुंसीत्यमरः जरायुजानिमनुष्यगवादीनिस्वेदजानिकृमिदंशादीनिउद्भिज्जानिभूमिमुद्भिद्यजातानितरुगुल्मादीनियथोक्तेष्वेवजरायुजानामश्वागावः पुरुषाहस्तिनइत्युदाहृत्यप्रदर्शनउक्तानामनुक्तानांचसं

श्री०
४२

क्षेपेणोपसंहारार्थयत्किंचेदंप्राणीत्यादिवाक्यंयदेतज्जगदुत्पत्तिस्थितिलयकारणत्वंचैतन्यस्यप्रज्ञानेत्रमितिपदेनसंग्रह्योक्तंतदेवविवृणोति॥ प्रज्ञानेप्रतिष्ठितंप्रज्ञानेत्रोलोकः प्रज्ञाप्रतिष्ठेति॥ ॥प्रज्ञानेनिरुपाधिकचैतन्येपूर्वोक्तंसर्वजगत्प्रतिष्ठितंरज्ज्वांसपवदारोपितमनेनोत्पत्तिहेतुत्वमुक्तंलोकः सर्वप्राणिसमूहः प्रज्ञानेत्रः प्रज्ञानचैतन्यमेवनेत्रंयस्यव्यवहारकारणमसौप्रज्ञानेत्रअनेनस्थितिहेतुत्वमुक्तंप्रज्ञाचैतन्यंप्रतिष्ठ्यस्थालयस्थानंपतितिष्ठति

विलीयतेऽत्रेति व्युत्पत्तेरनेन संहारहेतुत्वमुक्तमेतावताऽशा
खांतरप्रसिद्धं जगज्जन्मस्थितिलयकारणत्वाख्यं ब्रह्मण
स्तटस्थलक्षणत्वमुक्तं भवति तच्च लक्षणं तैत्तिरीया विस्पष्ट
मामनंति॥ यतो वा इमा० स्तत्त्वा॥ तदेवं विचारद्वयेन तत्त्वपदा
र्थौ शोधितो अथ महावाक्येन तयोरैक्यं दर्शयति॥ प्रज्ञानं ब्र
ह्मेति॥ ॥सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवंतीति
वाक्येन देहेंद्रियादिसाक्षिरूपं यत्प्रज्ञानं त्वंपदार्थरूपं निर्णी
तं तदेवैष ब्रह्मेत्यादिवाक्येन जगत्कारणतया निर्णीतं परं

ब्रह्म न चानयोरीषदपि भेदोऽस्त्यहंप्रत्ययगम्यत्वाकारेण य
दा विवक्ष्यते तदा जीव इत्युच्यते यदा तु शास्त्रप्रतिपादितत्वा
कारो विवक्षितस्तदानीं ब्रह्मेत्यभिधीयते तो व्यवहारभेदमा
त्रं न तु तत्त्वतो भेदोऽस्ति न चैवं सति पुनरुक्तिप्रसंगः अब्रह्मत्व
परोक्षत्वयोर्व्यावर्त्ययोर्भेदेन पदद्वयोपयोगादेतच्च क्वचित्
विस्पष्टमभिहितं॥ प्रत्यग्बोधाय आभाति सोऽद्वयानंदलक्षणः॥
अद्वयानंदरूपश्च प्रत्यग्बोधैकलक्षणः॥१॥ इत्थमन्योन्यता
दात्म्यप्रतिपत्तिर्यदा भवेत्॥ अब्रह्मत्वं त्वमर्थस्य व्यावर्त्येत तदैव

59

श्री०
४४

हि॥२॥तदर्थस्यचपारोक्ष्यंयद्येवंकिंततःशृणु॥ब्रह्मणानैदैकरूपे
णप्रत्यग्बोधोवशिष्यते॥इत्थंचतुर्थाध्यायेसञ्जातोभूतान्यभि
व्यैरव्यदित्यादिनाऽपवादप्रकरणेनसंगृहीतमात्मतत्वमस्मिं
नध्यायेतत्वंपदार्थविचारमुखेनप्रपंचितमथतत्वज्ञानफलं
दर्शयति॥ ॥सएतेनप्रज्ञेनात्मनास्माल्लोकादुत्क्रम्यामुष्मि
न्स्वर्गेलोकेसर्वान्कामानाप्त्वामृतःसमभवत्समभवत्॥ ॥
यःपुमान्प्रज्ञानंब्रह्मेत्येवंजानातिसपुमानेतेनप्रज्ञेनात्मनैवं
तन्यस्वरूपेणस्वयमाविर्भवतितदूर्ध्वंविदेहमुक्तिंप्रतिपद्यतेत

श्री०
४४

न्मुक्तिप्रतिपादिकंमस्माल्लोकादित्यादिवाक्यंपूर्वस्मिन्पंचमा
ध्यायेव्याख्यातंतस्यवाक्यस्यपुनरप्यत्रोक्तिर्विद्योपसंहारार्था
समभवदित्यभ्यासोऽध्यायसमाप्त्यर्थः॥ ॥इतिसायणाचार्यवि
रचिते०षष्ठोध्यायः॥षष्ठेतत्वविद्यांसमाप्यसप्तमेशांतिकरमं
त्रंपठति॥वाङ्मेमनसिप्रतिष्ठिता०वक्तारमिति॥यथोक्तेत
त्वविद्याप्रतिपादकग्रंथपाठेप्रवृत्तामदीयावाक्सर्वदामन
सिप्रतिष्ठितामनसायच्छेध्येयंविवक्षितंतदेवपठतुमनश्च
मदीयावाचिप्रतिष्ठितंयद्विद्याप्रतिपादकत्वेनवक्तव्यंशब्दजा

55

श्री० ४५

तमस्तिनदेवमनसा विवक्ष्यते एवमन्योन्यानुगृहीते वाङ्म
नसे विद्यार्थग्रंथं साकल्येनावधारयितुं शक्नुतो मनसः सा
वधानत्वाभावे वागिंद्रियं सुप्तोन्मत्तप्रलापादिवद्यत्किंचिद
संगतं ब्रूयात्तथा वाचः परवशाभासवेति गङ्गरूपया वाचास
र्वं विवक्षितं यथावन्नोच्चार्यते अतस्तयोरन्योन्याकूल्यम
स्त्वित्येवं प्रार्थ्य तेषोधाविधहे आत्मत्वे मेमदर्थमावीरेधि अवि
द्यावरणापनयेन प्रकटीभव वाङ्मनसे मे मदर्थं वेदस्य यथो
क्ततत्वविद्याप्रतिपादकस्य ग्रंथस्याणीस्थ आनयनसमर्थे

श्री० ४५

भवतां मे श्रुतं मया श्रोत्रेणागतं ग्रंथार्थजातं मा प्रहासीर्मा
परित्यजंतु विस्मृतं माभूदित्यर्थः ॥ अनेनाधीतेन विस्मरण
रहितेन ग्रंथेनाहोरात्रान्संदधामि संयोजयाम्यहनि रात्रौ वा
लस्यं परित्यज्य निरंतरं पठामीत्यर्थः अस्मिन्पठिते ग्रंथे ऋतं
परमार्थभूतं वस्तु वदिष्यामि विपरीतार्थवदनं कदाचिदपि मा
भूदित्यर्थः ऋतं मानसं सत्यं वाचिकं मनसा वस्तु तत्वं विचार्य
वाचा वदिष्यामीत्यर्थः तन्मया वक्ष्यमाणं ब्रह्मतत्वं मां शिष्यम
वतु सम्यग्बोधेन पालयतु तथा तद्ब्रह्मतत्वं वक्तारमाचार्यमव

श्री०
४६

नुबोधकत्वसामर्थ्यप्रदानेनपालयतु पुनरप्यवतुमामित्याद्यु
क्तिः फलविषयादपूर्वंसाधनकालेशिष्याचार्ययोः पालनंप्रा
र्थितमिदानींफलकालेपिप्रार्थ्यतेतत्रशिवस्याविद्यातत्कार्य
निवृत्तिः फलमाचार्यस्यतादृशसिष्यदर्शनेनविद्यासंप्रदा
यप्रवृत्तिप्रवृत्तः परितोषः फलमनेनमंत्रपाठेनविद्योत्पत्तेः
पुराविद्याप्रतिबंधकाविघ्नाः परिह्रियंतेविद्योत्पत्तेरूर्ध्वमसं
भावनाविपरीतभावनोत्पादकाविघ्नाः परिह्रियंतेअवतुवक्ता
रमित्यभ्यासोध्यायसमाप्त्यर्थोद्वितीयारण्यकसमाप्त्यर्थश्च॥वे

श्री०
४६

दार्थस्यप्रकाशेनतमोहार्दंनिवारयन्॥पुमर्थांश्चतुरोदेयाद्वि
द्यातीर्थमहेश्वरः॥ ॥इतिसायणाचार्यविरचितेमाधवीयेवेदा
र्थप्रकाशेऐतरेयारण्यंककांडेद्वितीयारण्यकेसप्तमोध्यायः॥
समाप्तः॥ ॥श्रीगुरुचरणार्पणमस्तु॥ ॥शके१७१५प्रमा
दिनामसंवत्सरेउदगयनेवसंतर्तौअधिकवैशाखमासेकृष्ण
पक्षेत्रयोदश्यांतिथौभानुवासरेदंपुस्तकंसमाप्तं॥सांगविकरोप
नामकबालादेवेनलिखितं॥ ॥इत्यात्मषट्कवृत्तिःसमाप्ता॥ ॥

५७

श्री०
४७

इत्यात्मषट्कः समाप्तिमगमत्॥

श्री०
४७

48

[OrderDescription]
,CREATED=26.10.20 10:07
,TRANSFERRED=2020/10/26 at 10:13:44
,PAGES=48
,TYPE=STD
,NAME=S0004522
,Book Name=M-926-AATAM BATAK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF